# सत्प्रतिपक्षविभाजकलक्षणमीमांसा

- *डॉ. महेशझा*

**शोधसारांशः -** पञ्चहेत्वाभासानां मध्ये सत्प्रतिपक्षः अनुमितिप्रतिबन्धको भवति । तच्च साध्याभावव्याप्यवान् पक्षः साध्यवदन्यत्वव्याप्यवान् पक्षः इत्याकारकः पक्षविशेष्यकः, एवं पक्षवृत्तिः साध्याभावव्याप्यः अथ च पक्षवृत्तिः साध्यवद्भेदव्याप्यश्चेत्येवं पक्षप्रकारकः विभिन्नस्वरूपो भवति । तत्र प्रत्येकं सत्प्रतिपक्षपदेन व्यवह्रियते। सत्प्रतिपक्षविभाजकलक्षणस्वीकारे बीजं किमिति जिज्ञासायामुच्यते । यत्र बाधः भवति तत्रैव सत्प्रतिपक्षोऽपि दोषः, बाधितहेतावेव सत्प्रतिपक्षितत्वव्यवहारः । एतन्मतमवलम्ब्यैव सत्प्रतिपक्षस्य विभाजकलक्षणं "विभाजकं तु प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति विशिष्टपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वम्" इति ग्रन्थेन दीधितिकृद्भिः विशेषरूपेण स्वीकृतमस्ति । तस्य स्वरूपं "प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यग्रहप्रतिबन्धकत्वविशिष्ट-
विशिष्टपक्षविशिष्टसाध्यग्रहस्याप्रतिबन्धकं यत् पक्षविशेष्यकसाध्यवैशिष्ट्यग्रहः पक्षः साध्यवान् इत्याकारकः तद्विरोधि यत् पक्षविशेष्यकसाध्याभावप्रकारकग्रहः तदुन्नायकत्वम्" इति लभ्यते । अस्यैव सत्प्रतिपक्षविभाजकलक्षणस्य गादाधरीदिशा प्रतिपदव्यावृत्तिप्रदर्शनपुरस्सरं परिष्कृतं स्वरूपं शोधप्रबन्धेऽस्मिन् प्रदर्शितमस्ति ।

तत्त्वनिर्णयाय विजयाय च यथा व्याप्तिविशिष्टपक्षधर्मताविशिष्टसद्धेतुत्वज्ञानं प्रयोजकं भवति तथैव हेतौ दुष्टत्वज्ञानमपि । दुष्टत्वज्ञाने सत्येव वाद्युद्भाविते यदि प्रतिवादिना दोषः समुद्भाव्यते तदा तस्य निराकरणं वादिना कर्तुं शक्यते । अथ च दुष्टत्वज्ञाने जाते एव पूर्वपक्षिमतं निराकर्तुं शक्यते । अतः हेतौ सद्धेतुत्वज्ञानमिव दुष्टहेतुत्वज्ञानमपि तत्त्वनिर्णयविजयप्रयोजकं भवति । अत एव दुष्टहेतुपरिज्ञानार्थं महर्षिणा गौतमेन "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः[१] इत्यनेन सूत्रेण पञ्चविधहेत्वाभासानां प्रदर्शनं विहितम् । स च हेत्वाभासः "हेतुवदाभासन्ते" इति व्युत्पत्त्या दुष्टहेतुबोधकः अथ च "हेतोः आभासाः" इति व्युत्पत्त्या हेतुदोषपरोऽपि । तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्ध-बाधितभेदेन दुष्टहेतुरूपस्य हेत्वाभासस्य पञ्चविधत्वम् एवं व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधभेदेन हेतुदोषस्यापि पञ्चविधत्वम् । इत्थं सत्प्रतिक्षपदं व्युत्पत्तिवैचित्र्येण दुष्टहेतुपरं हेतुदोषपरमपि भवति । यथा "सन् प्रतिपक्षः विरोधिपरामर्शः यस्य हेतोरसौ सत्प्रतिपक्षः "अनया व्युत्पत्त्या सत्प्रतिपक्षपदं दुष्टहेतुपरम् । "संश्चासौ प्रतिपक्षः" इति व्युत्पत्त्या हेतुदोषपरम् । सत्प्रतिपक्ष एव "प्रकरणसम" इत्युच्यते । प्रकरणसमहेत्वाभासस्य लक्षणं चकार महर्षिगौतमः "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः[२] । तथा च यत्प्रयुक्तेऽर्थे प्रकरणविषये चिन्ता भवति अर्थात् कस्यापि पक्षस्य निश्चयाभावे संशयविषयीभूतप्रतिपक्षविषयिण्याः जिज्ञासायाः उत्पत्तिः तन्निर्णयार्थमपदिष्टः हेतुरूपेण कथितः प्रकरणसमनामकः हेत्वाभासो भवति । यथा कश्चित् वादी कथयति शब्दोऽनित्यः नित्यधर्मानुपलब्धेः, तदनन्तरं प्रतिवादी कथयति शब्दो नित्यः अनित्यधर्मानुपलब्धेः, एतादृशस्थले हेतुः प्रतिहेतुश्च तुल्यबलशाली भवति । यथोक्तं दीधितिकृद्भिः[३] "सत्प्रतिपक्षो विरोधिव्याप्त्यादिमत्तया परामृष्यमाणो हेतुः विरोधिपरामर्शो वा यस्य परामृष्यमाणस्य वा हेतोरसौ सत्प्रतिपक्ष" इति । अस्तु, इदानीं सत्प्रतिपक्षविभाजकलक्षणविषयकविमर्शः प्रस्तूयते–

"[४]साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यकलिङ्गत्वं तत्त्वमि"त्यादिमूलग्रन्थेन सत्प्रतिपक्षदोषस्यानभिधानात् दीधितिकारः स्वयं सत्प्रतिपक्षलक्षणं प्रदर्शयितुमाह "सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवांश्च पक्षः, पक्षनिष्ठौ साध्याभावसाध्यवद्भेदव्याप्यौ इत्येवमादिः प्रत्येकमेव[५]" इति । सत्प्रतिपक्षस्तु इत्यत्र तु शब्देन मूलग्रन्थोक्तव्यवहारौपयिकलक्षणस्य सत्प्रतिपक्षविषयतावच्छेदकरूपदोषत्वस्य व्यवच्छेदः । इत्थं "साध्यविरोध्युपस्थापनसमर्थसमान-बलोपस्थितिप्रतिरुद्धकार्यकलिङ्गत्वं दोषत्वम्" इति न सत्प्रतिपक्षस्य विभाजकम्। साध्याभावव्याप्यवान् पक्षः अत्र पक्षतावच्छेदकाव- च्छिन्नसाध्याभावव्याप्यत्वावच्छिन्नप्रकारताशाल्यनुमिति-प्रतिबन्धकज्ञानविषयस्य सत्प्रतिपक्षितत्वमुपपादितम् अत्रैतद्दोषघटकव्याप्तेः साध्याभावावृत्तित्वरूप-व्याप्तिमनुसन्धाय । द्वितीयस्तावत् साध्यवदन्यावृत्तित्वरूपान्योन्याभावघटितव्याप्तिग्रहमभ्युपेत्य विरोधिपरामर्शः साध्यवदन्यत्वव्याप्यवत् पक्षस्वरूपस्य सत्प्रतिपक्षस्य ज्ञानं सम्पादयति।तृतीये तावत् पक्षप्रकारकस्यानुमितिविरोधिपरामर्शात्मकज्ञानविषयहेतुत्वरूपं सत्प्रतिपक्षितत्वं प्रतिपादितम् । चतुर्थे च साध्यवदन्यावृत्तित्वरूपं व्याप्तिमभिप्रेत्य विरोधिपरामर्शविषयलिङ्गत्वस्य दोषत्वमुपपादितम् । दीधितौ इत्येवमादिरित्यत्राधेयतासम्बन्धेन प्रकृतपक्षतावच्छेदकावच्छिन्नसाध्यकप्रकृतसाध्याभावादिपक्षिका याऽनुमितिः "पक्षे साध्याभावः" इत्याकारिका तज्जनकपरामर्शः "साध्याभावः पक्षवृत्तित्वव्याप्यवान्" इत्याकारकपरामर्शविषयसाध्याभावविशेष्यकप्रकृतपक्षव्याप्यत्वविशिष्टविषयकदोषसंग्रहाय आदि पदमुपात्तम् । यतो हि साध्याभावविशेष्यकपक्षवृत्तित्वप्रकारक "ह्रदे वह्न्यभावः" इत्याकारकबाधनिश्चयस्यापि "ह्रदे वह्निः" इत्याकारकानुमितिप्रतिबन्धकत्वेन "ह्रदे वह्न्यभावः" इत्याकारकबाधोन्नायकस्यापि "ह्रदवृत्तिः साध्याभावव्याप्यः" इत्याकारकपरामर्शस्यानुमितिप्रतिबन्धकत्वेन ह्रदवृत्तित्वविशिष्टवह्न्यभावव्याप्यस्यापि सत्प्रतिपक्षत्वस्वीकार आवश्यकः । अत एव च "पक्षवृत्तिः साध्याभावव्याप्यः एवं पक्षवृत्तिः साध्यव्याप्यः" इत्याकारकाधेयत्वसम्बन्धेन पक्षप्रकारकसाध्यव्याप्यत्वतदभावव्याप्यत्वावगाहिपरामर्शसम्वलनदशायां "ह्रदे वह्निः वह्न्यभावो वा" इत्याकारकवह्निवह्न्यभावविशेष्यिका संशयरूपानुमितिर्न जायते, अपित्वनुमितेः प्रतिबन्ध एव भवति । अत्र प्रत्येकं दोषत्वं नहि सत्प्रतिपक्षदोषविभाजकं, न वा तावत् समुदायत्वम् । अतः सत्प्रतिपक्षस्य विभाजकलक्षणं दीधितिकृदाह "विभाजकं तु प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति विशिष्टपक्षसाध्यग्राहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वम्" इति[६]।

अत्रेदं बोध्यम्, दीधितौ यत् भिन्नं-भिन्नं सत्प्रतिपक्षस्वरूपं प्रदर्शितं, तत्र प्रत्येकं विविधरूपाणां सत्प्रतिपक्षितहेतूनां संग्राहकं भवितुं नार्हति, न वा प्रत्येकगतसमुदायत्वस्यापि सकलरूपसंग्राहकत्वम् । अतः विशेषरूपेण सकलदोषसाधारणं विभाजकलक्षणं दीधितिकारैरभिहितम् । तत्र प्रकृतपदं पक्षे साध्ये चोभयोरेवान्वेति । एवञ्च सत्प्रतिपक्षविभाजकलक्षणन्तु "पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित-साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरू पितप्रतिबन्धकतावच्छेदिका सती विशिष्टपक्षविशिष्टसाध्यग्रहत्वाव्यापिका या प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिग्रहत्वव्यापिका या प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूत-विषयिता तद्रूपवत्वं सत्प्रतिपक्षत्वम्" । ह्रदो वह्निमान् धूमादित्यत्र ह्रदत्वावच्छिन्नविशेष्यतानिरूपित-वह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नप्रतिबध्यता निरूपितप्रतिबन्धकतावच्छेदिका, अथ च

"ह्रदत्वविशिष्टह्रद" इत्याकारकग्रहत्वस्याव्यापिका "वह्नित्वविशिष्टवह्नि" इत्याकारकग्रहत्वस्याव्यापिका या ह्रदविशेष्यकवह्निप्रकारकानुमितित्वव्यापिका प्रतिबध्यता, तादृशप्रतिबध्यतानिरूपितप्रतिबन्धकता-वच्छेदिका वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयिता, तादृशविषयित्वावच्छिन्नानुमितिः ह्रदो वह्न्यभाववा-नित्याकारिकानुमितिः, तन्निष्ठजन्यतानिरूपितजनकतावच्छेदिका वह्न्यभावव्याप्यजलवद्ह्रदत्वावच्छिन्न-विषयिता, तादृशवह्न्यभावव्याप्यजलवद्ह्रदत्वस्य वह्न्यभावव्याप्यजलवद्ह्रदे विद्यमानतया भवति ह्रदपक्षकवह्निसाध्यकधूमहेतुकस्थले वह्न्यभावव्याप्यजलवद्ध्रदस्य सत्प्रतिपक्षत्वम् । अत्र लक्षणे पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिब ध्यतानिरूपितप्रतिबन्धकतावच्छेदकान्तसत्यन्तविशेषणानुपादाने ह्रदो वह्निमान् धूमादित्यत्र सत्प्रतिपक्षोन्नायके वह्न्यभावव्याप्यव्याप्यवद्ह्रदेऽतिव्याप्तिः स्यात् । यतो हि ह्रदो वह्निमानित्याकारकानुमितिं प्रति यथा ह्रदो वह्न्यभाववान् इत्याकारकनिश्चयः प्रतिबन्धकः भवति तथैव "ह्रदो वह्न्यभावव्याप्यवान्" इति निश्चयस्यापि प्रतिबन्धकत्वं सर्वजनानुभवसिद्धम् । एवञ्च प्रकृतपक्षविशेष्यक-प्रकृतसाध्यप्रकारकानुमितिप्रतिबन्धकतावच्छेदकीभूता विषयिता वह्न्यभावव्याप्य-वद्ह्रदविषयितापि, सा च विषयिता, विशिष्टपक्षग्रहनिष्ठसाध्य-ग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता-नवच्छेदिकाऽपि, तादृशविषयित्वावच्छिन्नानुमितिपदेन" ह्रदः वह्न्यभावव्याप्यवान्" इत्याकारकानुमितेरपि धर्त्तुं शक्यतया तादृश-अनुमितिनिष्ठजन्यतानिरूपितज- नकतावच्छेदकविषयितायाः वह्न्यभावव्याप्यव्याप्य-वत्ह्रदरूपे ज्ञाने सत्त्वेन तद्रूपवत्वस्य वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपे सत्प्रतिपक्षोन्नायकेऽपि सत्वात् "वह्न्यभावव्याप्य-व्याप्यवद्ह्रदेऽतिव्याप्तिः स्यात् । एतद्दोषपरिहारार्थमुन्नायकीभूतायां यद्रूपावच्छिन्न-विषयितायां सत्यन्तविशेषणमुपात्तम् । तदुपादाने न सत्प्रतिपक्षोन्नायकीभूतायाः वह्न्यभावव्याप्य-व्याप्यवद्ह्रदविषयितायाः पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रति-बन्धकतावच्छेदकत्वस्यानभ्युपगमान्नातिव्याप्तिः ।

सत्प्रतिपक्षविभाजकलक्षणे पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धकतावच्छेदकत्वमुन्नाय-कविषयितायामनिवेश्य यद्युन्नायकविषये विशेषणं दीयते तदा विषयितायाः द्विधा निवेशे गौरवं स्यात् । यतो हि पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धकतावच्छेदकविषयितानिरूपिका या विरोध्यनुमितिः तज्जनकतावच्छेदकविषयिता, इत्थं यदि सत्यन्तं विषयिताकत्वरूपमुन्नायकविषयीभूतायां विरोध्यनुमितौ निवेश्यते तर्हि विषयितायाः द्विधा निवेशे व्यर्थं गौरवं स्यात् । अतः प्रतिबन्धकतावच्छेदकविषयिताकत्वरूपं विशेषणार्थं कल्पयित्वा तस्योन्नायकविषये गौरवम् । अतः प्रतिबन्धकतावच्छेदकविषयिताकत्वमनिवेश्य प्रतिबन्धिकावच्छेदिका या यद्रूपावच्छिन्नविषयिता इत्युक्तम् ।

विभाजकलक्षणे सत्यन्तदलघटक-अनुमितित्वव्यापकत्वमनिवेश्य अनुमितिनिष्ठप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकत्वनिवेशे ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपे सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः । तत्र प्रकृतपक्षकप्रकृतसाध्यकानुमितिपदेन "ह्रदो वह्निमान् वह्न्यभावव्याप्य-व्याप्याभाववांश्चे"-त्याकारकानुमितेरपि धर्तुं शक्यतया तादृशानुमितिप्रतिबन्धकतावच्छेदकत्वस्य सत्प्रतिपक्षोन्नायके वह्न्यभावव्याप्य-व्याप्यवद्ह्रदे सत्वात् । यतो हि "वह्न्यभावव्याप्यव्याप्यवद्ह्रद" इत्याकारकनिश्चयस्य "ह्रदो वह्निमान्" इत्याकारकानुमित्यप्रतिबन्धकत्वेऽपि तादृशानुमितिघटकवह्न्यभाव-व्याप्यव्याप्याभावस्य प्रतिबन्धकत्वात् । तादृशवह्न्यभावव्याप्यव्याप्यवत्ताग्रहस्य च विशिष्टपक्ष-विशिष्टसाध्यग्रहाविरोधिपक्षविशेष्यकसाध्यप्रकारकग्रहविरोध्यनुमितिजनकतावच्छेदकत्वेन च विशेष्यदलाक्रान्तत्वात् ।

यदि सत्यन्तदलघटकानुमितिपदमनुमितिसामान्यपरं निवेश्यते तदा तत्रानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य विशेषणता लभ्यते । एवञ्च पक्षविशेष्यकसाध्य-

प्रकारकानुमितित्वं यथा ह्रदो वह्निमान् वह्न्यभावव्याप्यव्याप्याभाववांश्चेत्याकारकसमूहालम्वनानुमितौ विद्यते, तथैव ह्रदो वह्निमान् इत्याकारकानुमितावपि तस्य विद्यमानतया तत्र च "वह्न्यभावव्याप्यव्याप्यवान् ह्रद" इत्याकारकसत्प्रतिपक्षोन्नायकज्ञानप्रतिबध्यत्वस्य विरहात्, ह्रदविशेष्यकवह्निप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वं "वह्न्यभावव्याप्यव्याप्यवद्ह्रदे नास्ति । अतो न सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः । अतः सत्यन्तदलघटकानुमितिप्रतिबन्धकतायां यत्किञ्चिदनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता-वच्छेदकत्वमुपेक्ष्य तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वनिवेशः ।

किञ्च तत्रैव सत्यन्तदले अनुमितित्वमनिवेश्य ग्रहत्वमात्रं ज्ञानत्वमात्रं वा निवेश्यते तदा असम्भवः स्यात् । ह्रदविशेष्यकवह्निप्रकारकग्रहपदेन "वह्न्यभाववान् ह्रदः वह्निमान्" इत्याकारकमाहार्यज्ञानमादाय तत्प्रतिबन्धकतायाः कुत्रापि ज्ञाने अभावादसम्भवः प्रसज्येत । यतो हि यद्यनुमितित्वेनानुमितिप्रवेशो न क्रियेत तर्हि ह्रदविशेष्यक-वह्निप्रकारकग्रहत्वं यथा "ह्रदो वह्निमान्" इत्यनुमितौ विद्यते तथैव "वह्न्यभाववान् ह्रदो वह्निमान्" इत्याकारकज्ञानेऽपि तस्य सत्त्वात्, तस्य च ज्ञानस्याऽहार्यज्ञानरूपतया, आहार्यज्ञानञ्च नहि कस्यापि प्रतिबन्धकं, न वा आहार्यज्ञानीयविषयता प्रतिबन्धकतावच्छेदिका भवितुमर्हत्यतोऽसम्भवः स्यात्। अनुमितित्वनिवेशे चाऽऽहार्यज्ञानस्याऽपरोक्षमात्रविषय-कत्वेनानुमितिस्वरूपत्वासम्भवादनुमितिपदेन तादृशाऽऽहार्यज्ञानरूप- समूहालम्वनज्ञानस्य ग्रहणासम्भवात् तत्र पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदका- वच्छिन्नप्रकारताशाल्यनुमितिपदेन "ह्रदो वह्निमान्" इत्याकारकानुमितेरेव धर्त्तुं शक्यतया तादृशानुमितित्वव्यापक- प्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदिका वह्न्यभावव्याप्यवद्ह्रदत्वावच्छिन्नविषयिता जाता । अतः तद्रूपवत्त्वस्य हेतौ सत्वान्नासम्भवः।

इत्थं "प्रकृतपक्षविशेष्यकसाध्यप्रकारकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती, विशिष्टपक्षसाध्यग्रहाविरोधिप्रकृतपक्ष-साध्यग्रहविरोध्यनुमितिजनकतावच्छेदिका यद्रूपावच्छिन्न-विषयिता तद्रूपवत्त्वम्" इत्येतल्लक्षणघटकीभूते सत्यन्दले यदि ग्रहत्वावच्छिन्नप्रतिबध्यतानिवेशे ग्रहत्वस्य पक्षविशेष्यकसाध्यप्रकारकग्रहत्वाभिन्नतया प्रतिबध्यतामात्रस्यैव ग्रहत्वावच्छिन्नतया पक्षविशेष्यक-साध्यप्रकारकत्वविशिष्टग्रहत्वस्याव्यावर्तकत्वेन विशेषणत्वं न स्यात् । अतः पक्षविशेष्यकसाध्यप्रकारकत्वविशिष्टह्रदत्वगतसमुदाय- वृत्तिग्रहत्वावच्छिन्नत्वं प्रतिबध्यतायां निवेशनीयम् । यथोक्तं[७] भट्टाचार्यैः "ह्रदः काञ्चनमयवह्निमान् काञ्चनमयह्रदो वह्निमानित्यादौ संग्राह्यस्य वह्न्यभावव्याप्यविशिष्टह्रदादेर्ज्ञानस्य प्रतिबध्यतावच्छेदककोटौ साध्यतावच्छेदकादि-घटककाञ्चनमयत्वादिविषयताया अनिवेशात्तद्घटितपक्षतावच्छेदकविशिष्टे साध्यतावच्छेदक-विशिष्टवैशिष्ट्यग्रहत्वं नोक्तज्ञानप्रतिबध्यतावच्छेदकमित्यव्याप्तिः स्यादतः स्वरूपसंबन्धरूपमवच्छिन्नत्वं परित्यज्य व्यापकत्वं प्रतिबध्यताविशेषणम्" । अत्र ह्रदो वह्निमान् इत्यादिस्थलानुरोधेन संग्राह्य वह्न्यभावव्याप्यविशिष्टह्रदादेः ज्ञानस्य "ह्रदो काञ्चनमयवह्निमान्" "काञ्चनमयह्रदो वह्निमान्" इत्याकारकज्ञाननिष्ठप्रतिबध्यतावच्छेदककोटौ साध्यतावच्छेदकादिघटितकाञ्चनमयत्वादिविषयतायाः "काञ्चनमयत्ववान् वह्निः" काञ्चनमयत्ववान् ह्रदः वा इत्याकारकविषयताया अनिवेशात् पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यग्रहत्वं नहि वह्न्यभावव्याप्यविशिष्टह्रदादेः प्रतिबध्यतावच्छेदकम् । अतः तत्रापि स्वरूपसम्बन्धरूपमवच्छेदकत्वं परित्यज्य व्यापकत्वरूपमवच्छेदकत्वं प्रतिबध्यताविशेषणं प्रदत्तम् । एवञ्च सत्प्रतिपक्षीयविषयितायां पक्षतावच्छेदका-वच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकत्वस्य सत्त्वेन

तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य वह्न्यभावव्याप्यवत् ह्रदत्वावच्छिन्नविषयितायां सत्त्वेन नाव्याप्तिः । यद्यपि प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारत्वावच्छिन्नविशेष्यतानिवेशैनैव सर्वत्र सत्प्रतिपक्षे लक्षणसमन्वयः कर्त्तुं शक्यते । तथाहि ह्रदत्वावच्छिन्नविशेष्यतानिरूपितकाञ्चनमयत्ववह्नित्वोभयधर्मावच्छिन्नप्रकारताया अपि ह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतात्वेन एवं काञ्चनमयह्रदत्वोभयधर्मावच्छिन्न-विशेष्यताया अपि वह्नित्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्न- विशेष्यतात्वेन "वह्न्यभावव्याप्यवान् ह्रद" इत्याकारकनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वात्, तदवच्छिन्नविषयताशालिग्रह-निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य सत्प्रतिपक्षीयविषयितायां सत्वात् तत्रापि लक्षणसमन्वयः कर्त्तुं शक्यते । तथापि यदि अनेन प्रकारेणोक्तस्थलीयसत्प्रतिपक्षेऽव्याप्तिर्वार्यते तदा सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः दुष्परिहार्या स्यात्। ह्रदो वह्निमान् वह्न्यभावव्याप्यव्याप्याभाव-वांश्चेत्याकारकज्ञानीय-वह्नित्वावच्छिन्नप्रकारताया अपि वह्न्यभावव्याप्यव्याप्याभाव-त्वावच्छिन्नप्रकारतात्वेन तादृशसत्प्रतिपक्षोन्नायकज्ञानप्रतिबध्यतावच्छेदकत्वात् । तादृशप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतायाः प्रकृतपक्षविशेष्यकप्रकृतसाध्यप्रकारक-ग्रहप्रतिबन्धकतावच्छेदकवह्न्यभावव्याप्यव्याप्यवत् ह्रदत्वावच्छिन्नविषयत्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकीभूतवह्न्यभावव्याप्यव्याप्यवत् ह्रदत्वा-वच्छिन्नविषयिताशालिज्ञाने विद्यमानत्वात् यद्रूपपदेन सत्प्रतिपक्षोन्नायकस्य "वह्न्यभावव्याप्यव्याप्यवद्ह्रदत्वस्यापि धर्तुं शक्यतया सत्प्रतिपक्षोन्नायकेऽतिव्याप्तेर्दुर्वारत्वात् । अतः पक्षविशेष्यक- साध्यप्रकारकग्रहत्वावच्छिन्नत्वं नहि ग्रहत्वनिष्ठावच्छेदकतानिरूपितप्रतिबध्यतापरम्, अपि तु ग्रहत्वव्यापकत्वमेव प्रतिबध्यतायां निवेशनीयम् । ननु प्रकृतानुमित्यवृत्तिविषयता इत्येवोच्यताम् किं सत्यन्तदलनिवेशेन, वह्न्यभावव्याप्यव्याप्यवान् ह्रद इत्यस्याऽनुमित्या सह समूहालंवनसंभवाद् वह्न्यभाव्याप्यव्याप्यवद्ह्रदेऽति- व्याप्तविरहात् । न च वह्न्यभावव्याप्यवान् ह्रद इत्यस्याप्रामाण्यज्ञानास्कन्दितस्याऽव्याप्यवृत्तित्वज्ञानास्कन्दितस्य वा अनुमित्या सह समूहालंवनसंभवादसंभवापत्तिरिति वाच्यम् । अप्रामाण्यज्ञानानास्कन्दिताऽव्याप्य-वृत्तित्वज्ञानानास्कन्दिता-नुमित्यवृत्तिविषयितेत्येवं निवेशेन दोषाभावात् । न च केवलवह्न्यभावव्याप्यव्याप्यवान् ह्रद इति ज्ञानीयविषयितायाः प्रकृतानुमित्यवृत्तित्वेनाऽतिव्याप्तिर्दुर्वारैवेति वाच्यम् । प्रकृतानुमितिवृत्तितानवच्छेदकं यद्रूपं तद्रूपावच्छिन्नत्वमित्येवं निवेशेन दोषाभावात् । वृत्तिता च स्वावच्छिन्ननिरूपकतानिरूपितविषयितावत्वसंबन्धेन। न च वह्न्यभावव्याप्यव्याप्याभाववद्ह्रदपक्ष-कवह्निसाध्यके वह्न्यभावव्याप्यव्याप्यवद्ह्रदेऽतिव्याप्तिः, सिद्धान्ते तु विशिष्टपक्षग्रहत्वाव्यापकत्वस्य प्रतिबध्यतायां निवेशेनैव वारणादिति वाच्यम्। विशिष्टपक्षग्रहवृत्तित्वस्य विशिष्टसाध्यग्रहवृत्तित्वस्य विषयितायां निवेशेन दोषाभावात्। न च वह्न्यभावव्याप्याभावव्याप्य-वद्ह्रदपक्षकवह्निसाध्यकसत्प्रतिपक्षेऽव्याप्तिः, निरुक्तविशिष्टपक्षग्रहवृत्तित्वस्य सत्प्रतिपक्षविषयता-यामभावादिति वाच्यम्। विशिष्टपक्षग्रहाव्यवहितप्राक्क्षणज्ञानवृत्तित्वस्य निवेशे दोषाभावात् । वह्न्यभावव्याप्यवान् ह्रद इत्यस्य प्रतिबध्यत्वेन पूर्वमुत्पत्तौ बाधकाभावात् । तत्रोच्यते, सिद्धान्ते व्यापकत्वादिप्रयुक्तगौरवस्य सत्वेऽपि अव्यवहितस्य क्षणादेश्चातिगुरुतया लाघवाभावात् । किञ्च जलाभाववद्-ध्रदपक्षकवह्निसाध्यके जलव्यापकवह्न्यभाव- समानाधिकरणजलवद्ध्रदरूप-सत्प्रतिपक्षेऽव्याप्तिः, निरुक्तसत्प्रतिपक्षविषयकनिश्चयस्य पक्षतावच्छेदकविशिष्टग्रहाऽव्यवहितप्राक्क्षणे उत्पादयितुमशक्यत्वादिति ।

विभाजकलक्षणघटक-उन्नेये विशिष्टपक्षग्रहाविरोधित्वस्यानिवेशे काञ्चनमयह्रदो वह्निमान् एतत्थले "काञ्चनमयत्वाभाववान् ह्रद" इत्याकारकाश्रयासिद्ध्युन्नायके" काञ्चनमयत्वाभावव्याप्यवान् ह्रद"

इत्यत्रातिव्याप्तिः। अत्र काञ्चनमयह्रदविशेष्यकवह्निप्रकारकानुमितित्वावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्य अथ च विशिष्टसाध्यग्रहाविरोधिपक्षविशेष्यकसाध्य-प्रकारकग्रहविरोधिनी याऽनुमितिः "काञ्चनमयत्वाभाववान् ह्रद" इत्याकारिका तादृशानुमितिप्रतिबन्धकता-वच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेद-कतायाः काञ्चनमयत्वाभावव्याप्य-वद्ह्रदत्वावच्छिन्नविषयितायां सत्वात् यद्रूपपदेन काञ्चनमयत्वाभावव्याप्यवद्-ह्रदत्वस्यापि धर्तुं शक्यतया तद्वत्वस्याश्रयासिद्ध्युन्नायके काञ्चनमयत्वाभावव्याप्यवद्ह्रदे सत्वादतिव्याप्तिः । अत उन्नेयेऽविरोध्यन्तविशेषणं दत्तम्। एवञ्च विशिष्टग्रहाविरोधित्वस्योन्नेये विशेषणत्वे "काञ्चनमयत्वाभाववान् ह्रद" इत्याकारकाश्रयासिद्ध्यात्मकनिश्चयस्य विशिष्टपक्षग्रहाविरोधित्वेन धर्त्तुमशक्यत्वान्नातिव्याप्तिः । एवं ह्रदः काञ्चनमयवह्निमानेतत्स्थलीयसाध्याप्रसिद्ध्युन्नायके काञ्चनमयत्वाभावव्याप्यवद्ह्रनावतिव्याप्ति-वारणाय विशिष्टसाध्यग्रहाविरोधित्वमप्युन्नेये विशेषणं देयम् ।

किन्त्वित्थं निवेशे कृते अधिकविषयितायाः निवेशनीयतया गौरवं प्रसज्येत । एवं काञ्चनमयह्रदो वह्निमानित्यत्र काञ्चनमयत्वाभाववद्ह्रदादिरूपाश्रयासिद्धिविशेषस्य सत्प्रतिपक्षदोषस्योन्नेये वह्न्यभाववद्ह्रदरूपबाधेऽविद्यमानतयाऽव्याप्तिश्च स्यात्। अत उन्नेये तदनिवेश्योन्नायकताघटकबाध-विषयितायामेवविशिष्टपक्षादिग्रहप्रतिबन्धकतानवच्छेदकत्वं निवेश्यम् । तथा च "प्रकृतपक्षतावच्छेदका-वच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्र तिबन्धकतावच्छेदिका सती, पक्षतावच्छेदकविशिष्टपक्षग्रहत्वव्यापकप्रति-बध्यतानिरूपितप्रतिबन्धकता-नवच्छेदकसाध्यतावच्छेदकविशिष्टसाध्यग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदिका या प्रकृतपक्षविशेष्यकसाध्यप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयिता तादृशविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपवत्वमि" त्येवं लक्षणमङ्गीकार्यम् ।

तदित्थं लक्षणस्वरूपं भवति "पक्षविशेष्यकसाध्यप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकत्वे सति विशिष्टपक्षग्रहत्वाव्यापक-पक्षविशेष्यक-साध्यप्रकारकग्रहत्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपवत्त्वं सत्प्रतिपक्षत्वम्" इति। अत्रोन्नेये बाधे विशिष्टपक्षसाध्यग्रहत्वा-व्यापकत्वस्यानिवेशे काञ्चनमयह्रदो वह्निमानिति स्थले एव "वह्न्यभाववान् काञ्चनमयह्रद" इत्याकारकबाधमादायाव्याप्तिः स्यात्। यतो हि तादृशबाधनिश्चयस्य विशिष्टपक्षसाध्यग्रहत्वावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदक- त्वस्याभावादुन्नेयविषयितापदेन बाधविषयितायाः धर्त्तुमशक्यत्वात् तादृशविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितापदेन वह्न्यभावव्याप्यवान् इत्याकारकविषयितायाः ग्रहणासम्भवादव्याप्तिः स्यात्। अतः ग्रहत्वव्यापकत्वनिवेशः । एवञ्च तादृशग्रहत्वस्योक्तस्थले "काञ्चनमयत्ववान् ह्रद" इत्याकारकज्ञानेऽपि विद्यमानतया तत्र च तादृशबाधनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतायाः अभावात् भवति बाधे विशिष्टपक्षग्रहत्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकत्वम्। एवञ्च तादृशबाधविषयित्वा- वच्छिन्नानुमितिनिष्ठजन्यतानिरूपित-जनकतावच्छेदकविषयितापदेन वह्न्यभावव्याप्यवत् काञ्चनमयह्रदत्वावच्छिन्नविषयितायाः धर्त्तुं शक्यतया नाव्याप्तिः ।

अत्र यदि विशिष्टपक्षग्रहत्वपर्याप्तावच्छेदकताकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदताकभिन्न-त्वमुन्नेयघटकप्रतिबध्यतायां निवेश्यते तदा "काञ्चनमयरजतमयह्रदो वह्निमान्" इत्यत्रैव "काञ्चनमयत्वाभाववान् ह्रद" इत्याकारकाश्रयासिद्ध्युन्नायके काञ्चनमयत्वाभावव्याप्यवान्ह्रद इत्यत्रातिव्याप्तिः स्यात् "काञ्चनमयत्ववान् ह्रद" इत्याकारककाञ्चनमयत्वरजतमयत्व-

विशिष्टह्रदविषयकग्रहत्वस्य काञ्चनमयत्वाभाववान् ह्रद इत्याकारकाश्रयासिद्ध्यत्मकनिश्चय-प्रतिबध्यतानवच्छेदकत्वात्। अतः विशिष्टपक्षग्रहत्वपर्याप्तावच्छेदकताकभिन्नत्वं विरोधिविषयितायामनिवेश्य विशिष्टपक्षग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रति- बन्धकतानवच्छेदकत्वं विरोधिविषयितायां निवेशनीयम् । तन्निवेशे च तादृशग्रहत्वव्यापकत्वस्यैव तादृशाश्रयासिद्धिविषयितायां सत्वान्नातिव्याप्तिः ।

इत्थं विशिष्टपक्षसाध्यग्रहत्वव्यापकत्वस्य प्रतिबध्यतायां निवेशेनैव ह्रदो वह्निमान् इत्यत्र "ह्रदत्ववान् ह्रद" इत्याकारकस्य विशिष्टपक्षग्रहस्य केनापि निश्चयेनाऽप्रतिबध्यतया तादृशविशिष्टपक्षग्रहत्वा-वच्छिन्नप्रतिबध्यताया अप्रसिद्ध्या तादृशग्रहत्वावच्छिन्नप्रतिबध्यताया अप्रसिद्धत्वात् सर्वत्रासम्भवः प्रसज्येत। तादृशग्रहत्वव्यापकत्वनिवेशे च नोक्तदोषः। तादृशविशिष्टपक्षग्रहत्वस्य ह्रदधर्मिकवह्न्यभावादि-प्रकारकनिश्चयप्रतिबध्यत्वादिति ।

किन्तु विशिष्टपक्षग्रहाविरोधित्वकथनेन यदि विशिष्टपक्षसाध्यग्रहत्वव्यापकप्रतिबध्यता-निरूपितप्रतिबन्धकतानवच्छेदकत्वस्योन्नेयभूतविषयितायां निवेशेऽपि कस्या अपि विरोधिज्ञाननिष्ठ-प्रतिबन्धकतानिरूपितप्रतिबध्यतायाः निर्धर्मितावच्छेदकक "ह्रदः" इत्याकारकज्ञानसाधारण-विशिष्टपक्षग्रहत्वस्य व्यापकत्वं न सम्भवति । अतः विशिष्टग्रहत्वावच्छिन्नत्वनिवेशे या तादृशग्रहत्वावच्छिन्नप्रतिबध्यत्वाप्रसिद्धिनिबन्धनो दोषः, स च दोषः ग्रहत्वव्यापकत्वनिवेशेऽपि तदवस्थ एव। यदि विशिष्टविषयकानुमितित्वव्यापकत्वं निवेश्यते तदा तादृशविशिष्टविषयकानुमितित्वं नहि निर्धर्मितावच्छेदकक "ह्रदः" इत्याकारकज्ञाने। अतः निर्धर्मितावच्छेदककह्रद इत्याकारकज्ञानस्यानुमितित्वनिवेशात् व्यावृत्तत्वेऽपि तादृशह्रदत्वविशिष्टविषयकानुमितित्वस्य "ह्रदो वह्निमान्" "ह्रदः घटवान्" "ह्रदः जलवान्" इत्याकारिकासु विविधास्वनुमितिष्वपि विद्यमानतया ह्रदत्वविशिष्टविषयकसकलानुमितीनां केनापि निश्चयेन प्रतिबध्यत्वासम्भवात् पक्षतावच्छेदकविशिष्ट-विषयकानुमितित्वस्यापि विशिष्टग्रहत्वपदेन धर्त्तुमशक्यतया तादृशानुमितित्वव्यापकप्रतिबध्यताऽप्रसिद्धैव। तथापि कामिनीजिज्ञासा कामिनीज्ञानातिरिक्तसकलज्ञानप्रतिबन्धिका यथा भवति तथैवात्रापि तादृगेव विरोधिविषयित्वावच्छिन्नप्रतिबध्यतायाः स्वीकरणीयतया नाऽप्रसिद्धिः ।

अत एव विभाजकलक्षणे पक्षतावच्छेदकविशिष्टपक्षग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धक-तावच्छेदकत्वस्य अथ च पक्षविशेष्यकसाध्यप्रकारकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता-वच्छेदकत्वस्य निवेशे प्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्य द्विधा निवेशे गौरवं विचिन्त्य लाघवादाह गदाधरः[८] "वस्तुतस्तु विरोधिताघटकप्रतिबध्यतायामेव पक्षतावच्छेदकविशिष्टविषयकानुमितित्वाव्यापकत्व-निवेशान्नाप्रसिद्धिरिति पूर्वमेवावेदितम्। एतेन कामिनीत्वस्य यत्र पक्षतावच्छेदकता तत्र पक्षतावच्छेदकादिविशिष्टविषयकानुमितित्वादेः कामिनीजिज्ञासाप्रतिबध्यत्वाव्याप्यत्वेपि न क्षतिः" इति। अत्र लक्षणे विरोधिनिश्चयनिष्ठप्रतिबन्धक- तानिरूपितप्रतिबध्यतायामेव पक्षतावच्छेदकविशिष्टविषयका-नुमितित्वव्यापकत्वमपि निवेशनीयम्। एवञ्च लक्षणस्वरूपम्- पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित-साध्यतावच्छेदकावच्छिन्नप्रकारता-शालिप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती, पक्षता-वच्छेदकविशिष्टपक्षग्रहत्वव्यापिका अथ च साध्यतावच्छेदकविशिष्टसाध्यग्रहत्वाव्यापिका या पक्षतावच्छेदकावच्छिन्नविशेष्यताकसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापिका प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठ-जन्यतानिरूपितजनकतावच्छेदिकायद्रूपा-वच्छिन्नविषयिता तद्रूपवत्वं सत्प्रतिपक्षत्वम्। तथा च नाऽप्रसिद्ध्यादिदोषः ।

इत्थं लक्षणघटकोन्नेयभूतबाधविषयित्वावच्छिन्नप्रतिबध्यतायामेव विशिष्टपक्षग्रहत्वाव्यापकत्वस्य निवेशेन यत्र कामिनीत्वमेव पक्षतावच्छेदकं तत्र तादृशकामिनीत्वरूपपक्षतावच्छेदक-विशिष्टविषयकानुमितित्वस्य कामिनीजिज्ञासाप्रतिबन्धत्वाभावेऽपि न कोऽपि दोषः ।

अत्रेदं विचिन्त्यते यदुक्तसत्प्रतिपक्षलक्षणे विशिष्टपक्षसाध्यग्रहाविरोधित्वस्योन्नेये निवेशे कृतेऽपि "वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमान्" एतत्स्थलीय "वह्न्यभावव्याप्यव्याप्यवान् ह्रदः" इत्याकारकाश्रयासिद्धावतिव्याप्तिः । तादृशाश्रयासिद्धिनिश्चयस्य पक्षे पक्षतावच्छेदकाभावावगाहित्वेन वह्न्यभावव्याप्यव्याप्याभावविशिष्टह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्वात्
तादृशाश्रयासिद्धिनिश्चयीयवह्न्यभावव्याप्यविशिष्टह्रदत्वावच्छिन्नविषयितायाः तादृशानुमितिप्रतिबन्धकतावच्छेदकत्वात् । अथ च तत्रत्या या वह्न्यभावव्याप्यत्वविशिष्टह्रदात्मिका सत्प्रतिपक्षविषयितारूपविरोधिविषयिता तादृशविषयिताशाली यो हि निश्चयः सः नहि वह्न्यभावव्याप्याभावविशिष्टह्रदरूपपक्षतावच्छेदकविशिष्टपक्षग्रहस्य विरोधी। अतः पक्षतावच्छेदकविशिष्टपक्षग्रहत्वाव्यापकः। अथ च तादृशपक्षविशेष्यकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयितापदेन वह्न्यभावव्याप्यवद्ध्रदविषयिताया अपि धर्त्तुं शक्यतया तादृशविषयित्वाच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितापदेन वह्न्यभावव्याप्यव्याप्यवद्ह्रदत्वावच्छिन्नविषयिताया अपि धर्त्तुं शक्यतया तद्रूपवत्त्वस्य वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपाश्रयासिद्धौ सत्वादतिव्याप्तिः ।

लक्षणे यद्युन्नेयेऽविरोध्यन्तविशेषणमनुपादाय उन्नायके एवाविरोध्यन्तविशेषणं दीयते तर्हि विशिष्टपक्ष-विशिष्टसाध्यग्रहाविरोधी यः पक्षविशेष्यक-साध्यप्रकारकग्रहविरोधी अथ च पक्षविशेष्यकसाध्यप्रकारकग्रहविरोधित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताशालियद्रूपावच्छिन्नविषयकनिश्चयः तद्रूपवत्वं सत्प्रतिपक्षत्वमित्येवं लक्षणमत्र जायते । एवञ्च "वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमान्" एतत्स्थलीय "वह्न्यभावव्याप्यव्याप्यवान् ह्रद" इत्याकारकाश्रयासिद्धिनिश्चयस्य "वह्न्यभावव्याप्यव्याप्याभाववान्" इत्याकारकपक्षतावच्छेदकविशिष्टपक्षग्रहविरोधित्वान्नहि तत्रातिव्याप्तिः सम्भवति ।

इत्थं यद्युन्नायकेऽविरोध्यन्तविशेषणमुपादायोक्ताश्रयासिद्धावव्याप्तिर्वार्यते तथापि "वह्निमान् ह्रदः वह्न्यभावव्याप्यव्याप्याभाववान्" एतत्स्थलीयवह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपे बाधे अतिव्याप्तिः । यतो हि तादृशबाधनिश्चयस्य वह्निविशिष्टह्रदरूपपक्षतावच्छेदकपक्षग्रहस्याविरोधित्वात्, अथ च वह्निमद्ह्रदविशेष्यकवह्न्यभावव्याप्यव्याप्याभावप्रकारकानुमितिविरोधित्वाच्च विशिष्टपक्षग्रहाविरोधी अथ च वह्निमद्ह्रदविशेष्यकवह्न्यभावव्याप्यव्याप्याभावप्रकारकानुमितिविरोधितया
तादृशप्रतिबन्धकतावच्छेदकविषयितापदेन वह्न्यभावव्याप्य-व्याप्यवद्ह्रदत्वावच्छिन्नविषयितायाः ग्रहणसम्भवात् सत्यन्तदलाक्रान्तत्वम् अथ च वह्न्यभावव्याप्यव्याप्याभाव-वद्ह्रदरूपानुमितिपदेन ग्रहणसम्भवात् विशेष्यदलाक्रान्ततया तथाविधविरोधिविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयितापदेनापि वह्न्यभावव्याप्यव्याप्यविशिष्टवह्निमद्ह्रदत्वस्य यद्रूपपदेन धर्त्तुं शक्यतया वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपे बाधे सत्वादतिव्याप्तिः । न केवलं बाधेऽतिव्याप्तिः अपि तु "वह्निमान् ह्रदः वह्न्यभावव्याप्यव्याप्याभाववान्" एतत्स्थलीयवह्न्यभावव्याप्यवद्ह्रदरूपाश्रयासिद्ध्युन्नायकेऽप्यतिव्याप्तिः । तादृशनिश्चयस्य वह्निमद्ह्रदरूपविशिष्टपक्षग्रहविरोधित्वेन "वह्निमद्ह्रदो वह्न्यभावव्याप्यव्याप्याभाववान्" इत्याकारकानुमितिविरोधित्वाच्च भवति वह्न्यभावव्याप्यवद्ह्रदरूपे आश्रयासिद्ध्युन्नायकेऽतिव्याप्तिः । यदीत्थं निवेशे कृते बाधे आश्रयासिद्ध्युन्नायके चातिव्याप्तिः भवति चेदेतद्दोषपरिहाराय विशिष्टपक्षसा-ध्यग्रहाविरोधित्वमुन्नेये उन्नायके चोभयत्रैव देयम् । तत्र वह्न्यभावव्याप्य-व्याप्यविशिष्टह्रदात्मकाश्रयासिद्धावुन्नायके विशिष्टपक्षग्रहविरोधित्वस्याभावान्नह्युक्तस्थले वह्न्यभावव्याप्य-व्याप्यविशिष्टह्रदात्मकबाधेऽतिव्याप्तिः ।

द्वितीये च वह्न्यभावव्याप्यविशिष्टह्रदात्मकः यः आश्रयासिद्धिः तत्रोन्नेये "वह्न्यभावव्याप्यविशिष्टह्रदे विशिष्टपक्षग्रहावि-रोधित्वस्यासत्वान्नातिव्याप्तिरिति ।

इत्थं यद्यपि पूर्वोक्तरीत्या उन्नेये उन्नायके चाविरोध्यन्तविशेषणमुपात्तं, तथापि ह्रदः वह्न्यभावव्याप्य-व्याप्याभाववह्न्युभयवानेतत्स्थलीय-वह्न्यभावव्याप्यवद्ह्रदरूपे बाधेऽव्याप्तिः स्यात्, तस्य विशिष्टपक्ष-साध्यग्रहाविरोधित्वादतः कल्पान्तरमाह गदाधरः- "उन्नेयविशेषणमेवाविरोध्यन्तमिति" । यद्धर्मावच्छिन्नप्रतिबध्यताघटितविरोधित्वं भवति तद्धर्मावच्छिन्नप्रतिबध्यताघटितप्रतिबन्धकतायाः विशेषणत्वं निवेश्य पूर्वोक्तदोषः वारणीयः । एवञ्च "यद्रूपावच्छिन्नविषयिता प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यावगाह्यनुमितित्वव्यापक- यादृशधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धक-तावच्छेदिका सती, पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित-साध्यतावच्छेदकावच्छिन्नप्रकारता-शाल्यनुमितित्वव्यापकतादृशधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमि तिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका तद्रूपवत्त्वम्" । इत्थं लक्षणस्य निर्वचने "वह्न्यभावव्याप्यव्याप्यवान् ह्रदो वह्निमान्" इति स्थले वह्न्यभावव्याप्यव्याप्यविशिष्टह्रदरूप-आश्रयासिद्धेःवह्न्यभावव्याप्य-व्याप्याभावविशिष्टह्रदात्मकग्रहत्वावच्छिन्नप्रतिबन्धकत्वेन सत्यन्तदला-क्रान्ततया तद्रूपावच्छिन्नाविरोधिनः वह्न्यभावव्याप्यवान् ह्रदः इत्याकारकसत्प्रतिपक्षस्यैवोन्नायकतया नहि तत्रातिव्याप्तिः ।

उन्नेयस्वरूपस्य "वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदः वह्न्यभाववान्" इत्याकारकबाधस्यैकरूपेण प्रतिबन्धकत्वाभावान्नह्युक्तस्थले कथमप्यतिव्याप्तिः । ह्रदो वह्निमान् धूमादित्यादौ च "वह्न्यभाववान् ह्रदः" इत्याकारकज्ञानरूपबाधस्य "वह्न्यभावव्याप्यवान् ह्रदः" इत्याकारकसत्प्रतिपक्षस्य चैकरूपेण प्रतिबन्धकतया अर्थात् पक्षविशेष्यकसाध्यप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः बाधे सत्प्रतिपक्षेऽप्येकरूपेण विद्यमानतया भवति "वह्न्यभावव्याप्यवद्ह्रदे" लक्षणसमन्वयः । तथा च लक्षणस्वरूपं भवति "पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारता-शाल्यनुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका या पक्षविशेष्यकसाध्य-प्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यता निरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपवत्त्वं सत्प्रतिपक्षत्वम्" इति । अत्र लक्षणे एतत् पूर्वं पक्षविशेष्यकसाध्यप्रकारकानुमितावुन्नेयेऽविरोध्यन्तं विशेषणम् अथ च पक्षविशेष्यकसाध्य-प्रकारकानुमितिप्रतिबन्धके उन्नायकेऽविरोध्यन्तविशेषणं सिद्धान्तितमस्माभिः । अत्रेदं विचिन्त्यते यत् वह्निव्याप्याभाववान् जलादित्याकारकानुमितौ वह्निव्याप्यवत्पक्षस्वरूपस्य बाधस्य विशिष्टपक्षविशिष्टसाध्यग्रहाविरोधिनः "वह्निमान् ह्रद" इत्याकारकज्ञानोन्नायकस्य सत्प्रतिपक्षत्वापत्तिवारणायाग्रे उन्नेयेऽविरोध्यन्तविशेषणस्योपादानं कृतम्, तत्र च यथाश्रुते विरोध्युन्नायकत्वं" प्रकृतपक्षक-प्रकृतसाध्यकानुमि-तिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदक-विषयितावि‌शिष्टविषयित्वावच्छिन्नानुमितिप्रयोजकत्वरूपम्" । तत्र प्रतिबन्धकतावच्छेदकविषयता-निरूपकविषयितात्वेन रूपेण प्रवेशे शिरोवेष्टनेन नासिकास्पर्शमनुधावति, यतो हि विशिष्टपक्ष-विशिष्ट-साध्यग्रहाविरोधियज्ज्ञानं तादृशज्ञानीयविषयितात्वेन ग्रहणसम्भवः, एतादृशरीत्या निवेशे गौरवं स्यात् । अतः प्रतिबन्धकतावच्छेदकविषयितावि‌शिष्टविषयित्वावच्छिन्नविषयितात्वेन विषयितायाः निवेशं परित्यज्य अत्र लक्षणे प्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वेन यद्रूपावच्छिन्नविषयितायाः प्रवेशः कृतः । एवञ्च वह्निव्याप्याभावसाध्यकस्थले वह्निव्याप्यवत्पर्वत-

रूपबाधस्य "वह्निमान् पर्वतः वह्निव्याप्यवान्" इत्याकारकसमूहालम्वनानुमितिप्रयोजकतया वह्निमत् पर्वतरूपबाधेऽतिव्याप्तिः । अतः विरोधिविषयित्वावच्छिन्ननिरूपितप्रयोजकत्वं निवेशितम् । एवञ्च लक्षणस्वरूपम् - प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्न-प्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका विशिष्टपक्षविशिष्टसाध्यग्रहत्वा-व्यापिका या पक्षविशेष्यकसाध्यप्रकारकग्रहत्वव्यापकप्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदक-विषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयिता तद्रूपवत्वमिति ।

अत्र लक्षणे जनकतावच्छेदकत्वमित्यत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपमेव विवक्षितम् । एवञ्च "पर्वतो वह्निव्याप्याभाववान्" इत्याकारकानुमितिविरोधी "वह्निव्याप्यवान् पर्वत" इत्याकारकपर्वतरूप-बाधोन्नायकत्वस्य "वह्निव्याप्यवान् पर्वतो वह्निव्याप्य-व्याप्यवान्" इत्याकारकज्ञानविषये बाधे नातिव्याप्तिः । यतो हि तादृशसमूहालम्वनात्मकविरोध्यनुमितिजनकीभूते "वह्निव्याप्यवान् पर्वतो वह्निव्याप्य-व्याप्यवान्" इति ज्ञानविषये बाधेऽनुमितिजनकतानतिरिक्तवृत्तित्वविरहान्नातिव्याप्तिरिति ।

इत्थमेतल्लक्षणघटकीभूतानुमितिजनकत्वस्वरूपोन्नायकत्वं नहि विषयगतमपि तु अनुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतविषयिताकत्वस्वरूपम् अनुमितिजनकत्वमेवोन्ना-यकत्वमत्रलक्षणे निविष्टम् । इममेवाशयं प्रदर्शयितुमाह दीधितिकारः - "उन्नायकत्वञ्च" यादृशविशिष्टविषयकत्वेन परामर्शस्यानुमितिजनकत्वं तत्त्वमिति[१०] । उन्नायकत्वं ह्यत्र यादृशविशिष्टविषयकत्वेन इत्यत्र तृतीयार्थः अनतिरिक्तवृत्तित्वरूपमेवावच्छेदकत्वं निवेशनीयम् । यदि तृतीयार्थः अनतिरिक्तवृत्तित्वरूपमनिवेश्य स्वरूपसम्बन्धरूपावच्छेदकत्वं निवेश्यते तदा यद्रूपावच्छिन्नविषयिताऽनुमितिजनकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतावती तद्रूपवत्त्वं सत्प्रतिपक्षत्वमिति लक्षणं लभ्यते । तथा च केवलह्रदेऽपि स्वरूपसम्बन्धरूपावच्छेदकताघटित-विशेष्यदलस्य सत्वेन अतिव्याप्तिः स्यात् । अनतिरिक्तवृत्तित्वनिवेशे च केवलह्रदविषयतायामनुमितिजनक-तानतिरिक्तवृत्तित्वरूपावच्छेदकतायाः विरहान्न तत्रातिव्याप्तिः ।

तदित्थं वह्निव्याप्याभावसाध्यकस्थले वह्निव्याप्याभावानुमितिविरोधिवह्निव्याप्य-वत्पर्वतरूपोन्नायकत्वस्य "वह्निव्याप्यवान् पर्वतो वह्निव्याप्यव्याप्यवान्" इति ज्ञानविषये अनतिरिक्तवृत्तित्वनिवेशान्नातिव्याप्तिः । यतो हि पक्षविशेष्यकसाध्याभावग्रह-रूपविरोध्यनुमितिनिष्ठजन्यतानिरूपितजनकतानतिरिक्तवृत्तित्वस्य बाधविषयितायामभावात् । एवं प्रकारेणोन्नेये जनकतावच्छेदकत्वमनतिरिक्तवृत्तित्वं निवेशनीयम् । एवमुन्नायकताशरीरेऽपि अवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपमेव निवेशनीयम् । अन्यथा ह्रदो वह्निमान् इत्यत्र ह्रदो वह्न्यभाववान् वह्न्यभावव्याप्यव्याप्यवांश्चेत्याकारकोभयविशिष्टह्रदत्वावच्छिन्ना या विषयिता, तस्याः ह्रदो वह्निमानित्याकारकानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वेन, अथ च तस्याः विषयितायाः वह्न्यभावव्याप्यव्याप्यत्वावच्छिन्नविषयितानिरूपितह्रदत्वावच्छिन्नविषयितात्वेन विरोध्यनुमितिजनकता-वच्छेदकतया वह्न्यभावविशिष्टह्रदादिरूपे बाधे चातिव्याप्तिः स्यादिति ।

एवञ्च लक्षणघटकोन्नायके उन्नेये च प्रविष्टायाः अवच्छेदकतायाः अनतिरिक्तवृत्तित्वस्वरूपावच्छेदकतायाः प्रवेशेऽपि विरोध्यन्तं यत् सत्यन्तं तत्राप्यनतिरिक्तवृत्तित्व-रूपमेवावच्छेदकत्वं निवेशनीयम् । तथा च लक्षणस्वरूपम्-पक्षतावच्छेदकावच्छिन्नविशेष्यता-निरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारता-शाल्यनुमितित्वव्यापकप्रतिब-ध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती, विशिष्टपक्षग्रहत्वाव्यापिका अथ च विशिष्टसाध्यग्रहत्वाव्यापिका या पक्षविशेष्यकसाध्यप्रकारकग्रहत्वव्यापिकाप्रतिबध्यता तन्निरूपित-प्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्न-विषयिता तद्रूपवत्त्वं सत्प्रतिपक्षत्वमिति । ह्रदो वह्निमान् धूमादित्यत्र ह्रदत्वावच्छिन्नविशेष्यतानिरूपित-

वह्निनत्वावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका "वह्न्यभाव-व्याप्यवज्जलवद्ह्रदत्वावच्छिन्नविषयिता" सा च ह्रदत्वविशिष्टग्रहत्वाव्यापिका वह्निनत्वविशिष्टग्रहत्वाव्यापिका अथ च ह्रदविशेष्यकवह्निप्रकारकग्रहत्वव्यापिका प्रतिबध्यता तन्निरूपित-प्रतिबन्धकतावच्छेदकवह्न्यभाववद्ह्रदत्वावच्छिन्नविषयिता तादृशविषयित्वावच्छिन्नानुमितिनिष्ठजन्यता-निरूपितजनकतावच्छेदिकावह्न्यभावव्याप्यजलवद्ह्रदत्वावच्छिन्नविषयिता यद्रूपपदेन ग्राह्या, तद्रूपवत्वस्य वह्न्यभावव्याप्यजलवद्ह्रदे सत्वात् भवति लक्षणसमन्वयः ।

यदि विभाजकलक्षणेऽनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमनिवेश्य स्वरूपसम्बन्धरूपमवच्छेदकत्वं निवेश्यते तदा ह्रदो वह्निमान् इत्यत्र वह्न्यभावव्याप्यव्याप्यवद्ह्रदरूपे सत्प्रतिपक्षोन्नायकेऽतिव्याप्तिः स्यात्, वह्न्यभावव्याप्य-व्याप्यवद्ह्रदत्वावच्छिन्नविषयितायाः
वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयित्वाभिन्नतया यथा वह्न्यभावविशि-ष्टह्रदत्वावच्छिन्नविषयितायाः अनुमितिप्रतिबन्धकतावच्छेदकत्वं तथैव वह्न्यभावव्याप्यविशिष्टह्रदत्वावच्छिन्न-विषयितायाः अपि अनुमितिप्रतिबन्धकतावच्छेदकत्वात् । यदा त्वनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं निवेशितं तदा वह्न्यभावव्याप्यव्याप्यवद्ह्रदत्वावच्छिन्नविषयिताया असमूहालम्वनात्मिकायाः प्रतिबन्धकता-नतिरिक्तवृत्तित्वान्नातिव्याप्तिः । अतोऽत्र लक्षणे सर्वत्रैवावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपमेव निवेशनीयम् ।

तथापि ह्रदो वह्निमान् जलादित्यत्र "वह्निव्यापकीभूतभावप्रतियोगिजलवान् ह्रद" "इत्याकारकज्ञानस्य मतभेदेन विरोध-असाधारणस्वरूपतया तत्रातिव्याप्तिः । वह्निव्यापकीभूताभावप्रतियोगिजलवद्ह्रदत्वावच्छिन्नविषयितायाः पक्षे साध्यप्रकारकज्ञान-प्रतिबन्धकतावच्छेदकत्वात् । एवं विशिष्टपक्ष-विशिष्टसाध्यग्रहत्वाव्यापिका या पक्षविशेष्यकसाध्यप्रकारकग्रहत्वव्यापिका प्रतिबध्यता तन्निरूपितप्रतिबन्धकतावच्छेदकीभूत-वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयित्वावच्छिन्नजन्यतानिरूपितव्यतिरेकव्याप्तिज्ञानत्वेन जनकत्वाच्च, वह्निव्यापकीभूताभावजलवद्ह्रदेऽतिव्याप्तिः । तं वारयितुमाह दीधितिकारः – असाधारण-विरोधयोरन्यतरस्य प्रतिपक्षविधया दोषत्वपक्षे प्रकृतसाधने प्रकृतसाध्यव्यापकाभावप्रतियोगित्वाद्यनवगाही परामर्शो ग्राह्यः इति[११]। अर्थात् "असाधारण्यविरोधयोरन्यतरस्य सत्प्रतिपक्षत्वेन यदि दोषत्वमभ्युपेयते तदा प्रकृतहेतौ प्रकृतसाध्यव्यापकीभूताभावप्रतियोगित्वानवगाह्येव परामर्शो ग्राह्यः । यदि च सपक्षव्यावृत्तत्वमसाधारण्यम्, साध्यस्यासामानाधिकरण्यं विरोधः, इत्थं विरोधाऽसाधारण्यनिर्वचनेन तयोरनुमित्यप्रति- बन्धकत्वादुक्तलक्षणस्यासाधारणविरोधयोरतिव्याप्तिसम्भवात् । अत उक्तं दीधितौ असाधारणविरोधयोः प्रतिपक्षत्वे दोषत्वाऽभ्युपगमेऽतिव्याप्तिरिति । यदि असाधारणविरोधयोः प्रकृतसाध्यव्यापकाभावप्रतियोगित्वेन सत्प्रतिपक्षविधयाऽनुमितिविरोधित्वमभ्युपेयते तदा तत्रातिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकप्रकृतसाध्यता-वच्छेदकविशिष्टसाध्यव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिपरा मर्शनिष्ठानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताकत्वरूपमुन्नायकत्वं लक्षणे निवेशनीयम् । उक्तासाधारणविरोधयोः साध्यतावच्छेदकावच्छिन्नव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतहेतुता-वच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वेन तत्र तादृशवैशिष्ट्यानवगाहिपरामर्शवृत्त्यनुमितिजनकतावच्छेदक-विषयिताकत्वरूपोन्नायकत्वस्याभावान्नहि तत्रातिव्याप्तिः ।

केचन तार्किकाः साध्यव्यापकाभावप्रतियोगिप्रकृतहेतुमान् पक्षः इत्याकारकज्ञानस्य विरोधसाधारणान्यतररूपत्वमभ्युपगच्छन्ति, तेषां मते "साध्यव्यापकीभूताभावप्रतियोगिहेतुमान् पक्षः" इत्याकारकज्ञानस्य साध्याभावव्याप्यवत्ताज्ञानत्वेन रूपेण प्रतिबन्धकतया अथ च पक्षविशेष्यकसाध्य-प्रकारकानुमितिप्रतिबन्धकज्ञानविषयतया चानुमितिविरोधित्वम् अथ चानुमितिजनकत्वं तत्रापि विद्यते । अतः तत्रातिव्याप्तिवारणाय उन्नायककुक्षौ प्रकृतसाध्यव्यापकाभावप्रतियोगित्वानवगाहित्वं परामर्शे विशेषणं

देयम् । यथोक्तं भट्टाचार्यैः "तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षे प्रकृतसाध्यतावच्छेदकविशिष्टव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिपरामर्शनिष्ठानुमितिजनकतावच्छेदक-विषयिताकत्वरूपमुन्नायकत्वं विवक्षणीयमित्यर्थः" इति[१२] । एवञ्च "प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्टानवगाहि, अथ च पक्षविशेष्यकसाध्याभावप्रकारकानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताकत्वरूपमुन्नायकत्वमत्र ग्राह्यम् । तथा च वह्निव्यापकीभूताभावप्रतियोगिप्रकृतहेतुमत्पक्षरूपस्य विरोधासाधारणान्यतरस्य वह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टधूमत्वावच्छिन्नवैशिष्ट्यावगाहित्वेन वैशिष्ट्यानवगाहिपरामर्शपदेन तादृशविरोधाऽसाधारणयोः ग्रहणाऽसम्भवान्नातिव्याप्तिः । न च प्रकृतपक्षे प्रकृतसाध्यतावच्छेदकविशिष्टव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुवैशिष्ट्यानवगाहित्वमात्रस्य परामर्शे निवेशादेवोक्तदोषवारणसम्भवात् हेतुतावच्छेदकावच्छिन्नत्वनिवेशनं व्यर्थमितिवाच्यम् । यादृशस्थले वह्निव्यापकीभूताभावद्रव्यवद्ह्रदकालीनजलादेः सत्प्रतिपक्षता भवति तत्राव्याप्तिवारणाय हेतुतावच्छेदकावच्छिन्नत्वप्रवेशः । यथा ह्रदो वह्निमान् धूमादित्यत्र "वह्निव्याप्यधूमवान् ह्रद" इत्याकारकपरामर्शकालीनवह्न्यभावव्याप्यवह्निव्यापकीभूताभावप्रतियोगिद्रव्यवद्ह्रदकालीनजलवद्ह्रदस्य सत्प्रतिपक्षता स्वीक्रियते, हेतुतावच्छेदकावच्छिन्नत्वनिवेशे तत्संग्रहो न स्यात् । अत हेतुतावच्छेदकावच्छिन्नत्वप्रवेशः तन्निवेशे च तादृशपरामर्शस्य साध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुवैशिष्ट्यावगाहित्वेऽपि हेतुतावच्छेदकविशिष्ट-वैशिष्ट्यानवगाहित्वात् भवति तत्संग्रहः ।

लक्षणे यदि साध्यतावच्छेदकवैशिष्ट्यमनिवेश्य साध्यव्यापकत्वमात्रं निवेश्यते तदा ह्रदः तेजोव्यापकीभूताभावप्रतियोगित्ववद्जलवद्ह्रदकालीनवह्निमानित्यत्र तेजोव्यापकीभूताभावप्रतियोगिजलवद्ह्रदकालीनवह्न्यभाव-व्याप्यवद्ह्रदरूपसत्प्रतिपक्षस्य संग्रहो न स्यात् । यतः विरोध्यजनकीभूते तेजोव्यापकीभूताभावप्रतियोगिजलवद्ह्रदकालीनवह्न्यभावव्याप्यवद्ह्रदस्य साध्यव्यापकीभूताभावप्रतियोगिहेतुवैशिष्ट्यावगाहित्वसत्वात् । अतः साध्यव्यापकत्वमनिवेश्य साध्यतावच्छेदकावच्छिन्नव्यापकत्वं निवेशितम् । तन्निवेशे च प्रकृतसाध्यतावच्छेदकीभूतवह्निवैशिष्ट्यस्य तत्राभावान्नाव्याप्तिः ।

इदमत्रावधेयम् । सत्प्रतिपक्षस्तावत् साध्याभावव्याप्यहेतुमत्पक्षरूपः, तद्घटकीभूता साध्याभावव्याप्तिस्तावत् साध्याभावाभाववदवृत्तित्वम् अथवा प्रतिहेतुव्यापकसाध्यसामानाधिकरण्यम् । तत्र प्रथमे "साध्याभावाभाववदवृत्तिमान् पक्ष" इत्याकारकविरोधिपरामर्शस्य ज्ञानवैशिष्ट्यानवच्छिन्नत्वेनैव प्रतिबन्धकत्वमभ्युपेयते । द्वितीयस्य च प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपस्य प्रतिबन्धकत्वं ज्ञानवैशिष्ट्यावच्छिन्नत्वेन । एवञ्च केवलप्रतिहेतुमान् पक्ष इत्याकारकनिश्चयस्यापि प्रतिबन्धकत्वात्, साध्याभावनिरूपिताऽन्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षस्यापि सत्प्रतिपक्षता स्वीक्रियते । अतः तस्यापि लक्ष्यतया नहि तत्रातिव्याप्तिः । यदि तस्य सत्प्रतिपक्षता न स्वीक्रियतेऽसाधारणत्वमात्रं तत्र व्यवह्रिते तदा पक्षे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुवैशिष्ट्यानवगाहित्वमपि विशेषणं देयम्। इत्थं सत्प्रतिपक्षोन्नायकस्य वह्न्यभावव्याप्यव्याप्यवद् ह्रदादावतिव्याप्तिवारणाय प्रकृतपक्षविशेष्यकसाध्यप्रकारकानुमितिविरोधित्वविशेषणं लक्षणे प्रदेयम् । उन्नेयेऽविरोध्यन्तविशेषणं च काञ्चनमयपर्वतो वह्निमानित्यत्र "काञ्चनमयत्वाभावव्याप्यवान् पर्वत" इत्याकारकाश्रयासिद्ध्युन्नायकेऽतिव्याप्तिवारणार्थं विशिष्टपक्षविशिष्टसाध्यग्रहाविरोधित्वमुन्नेये विशेषणं प्रदेयम् । एवमुन्नेयकोटौ प्रकृतपक्षविशेष्यकसाध्यप्रकारकग्रहविरोधित्वनिवेशेन वह्निव्याप्याभावसाध्यकस्थले वह्निव्याप्यवत्पक्षरूपे बाधेऽतिव्याप्तिवारणाय पक्षविशेष्यकसाध्यप्रकारकग्रहविरोधित्वविशेषणमुपादेयम् । एवंविधलक्षणकरणेन काञ्चनमयवह्निमानित्याद्यनुमितिस्थले वह्न्यभावव्याप्यह्रदत्वादिमान् पक्ष

इत्यस्यापि संग्रहः जायते । वस्ततस्तु सत्प्रतिपक्षेऽपि स्व-स्वसिद्धान्तानुसारं तत्तद्वादिनः प्रतिज्ञादिपञ्चावयवानां प्रयोगं स्वीकुर्वन्ति । एष हेतुः साध्यव्यभिचारीति प्रयोगः यथा भवति तथैव एष पक्षः साध्याभावव्याप्यवानित्यादिरीत्या प्रयोगः कर्त्तुं शक्यत इति शम् ।।

## सन्दर्भसूची -


१. न्यायसूत्रम्-१-२-४
२. न्या.सू.१-२-६
३. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.- १७८७
४. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे चिन्तामणिः, पृ.-१७८७
५. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.-१८२९
६. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.-१८२९
७. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे गादाधरी, पृ.-१८३१-३२
८. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे गादाधरी, पृ.-१८३३
९. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे गादाधरी, पृ.-१८३३
१०. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.-१८२९
११. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.-१८२९
१२. अनुमानगादाधर्यां सत्प्रतिपक्षप्रकरणे दीधितिः, पृ.-१८३४-३५



*सहाचार्योऽध्यक्षश्च (नव्यन्यायविभागः)*
*राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)*
*श्रीसदाशिवपरिसरः, पुरी*